# গাযত্রী লহরী

{॥ গাযত্রী লহরী ॥}

অমন্দানন্দেনামরবরগৃহে বাস নিরতাং-

নরং গাযন্তং যা ভুবি ভবভযাত্ত্রাযত ইহ ।

সুরেশৈঃ সম্পূজ্যাং মুনিগণনুতাং তাং সুখকরীং

নমামো গাযত্রীং নিখিলমনুজাঘৌঘশমনীম্ ॥ ১॥

অবামা সংযুক্তং সকলমনুজৈর্জাপ্যমভিতো-

হ্যপাযাৎপাযাড্ভূরথ ভুবি ভুবঃ স্বঃ পদমিতি ।

পদং তন্মে পাদাববতু সবিতুশ্চৈব জঘনে-

বরেণ্যং শ্রোণিং মে সততমবতান্নাভিমপি চ ॥ ২॥

পদং ভর্গো দেবস্য মম হৃদযং ধীমহি তথা-

গলম্পাযান্নিত্যং ধিয ইহ পদং চৈব রসনাম্ ।

তথা নেত্রে যোঽব্যাদলকমবতান্নঃ পদমিতি-

শিরোদেশং পাযান্মম তু পরিতশ্চান্তিমপদম্ ॥ ৩॥

অযে দিব্যে দেবি ত্রিদশনিবহৈর্বন্দিতপদে

ন শেকুস্ত্বাং স্তোতুং ভগবতি মহান্তোঽপি মুনযঃ ।

কথংকারং তর্হিস্তুতিততিরিযং মে শুভতরা-

তথা পূর্ণা ভূযাত্ ত্রুটিপরিযুতা ভাবরহিতা ॥ ৪॥

Stotram Digitalized By Sanskritdocuments.org

ভজন্তং নির্ব্যাজং তব সুখদমন্ত্রং বিজযিনং
জনং যাবজ্জীবং জপতি জননি ত্বং সুখযসি ।
ন বা কামং কাচিত্ কলুষকণিকাঽপি স্পৃশতি তং
সংসারং সংসারং সরতি সহসা তস্য সততম্ ॥ ৫॥

দধানাং হ্যাধানং সিতকুবলযাস্ফালনরুচাং
স্বযং বিভ্রাজন্তীং ত্রিভুবনজনাহ্লাদনকরীম্ ।
অলং চালং চালং মম চকিতচিত্তং সুচপলং
চলচ্চন্দ্রাস্যে ত্বদ্বদনরুচমাচাময চিরম্ ॥ ৬॥

ললামে ভালে তে বহুতর বিশালেঽতি বিমলে
কলাচঞ্চচ্চান্দ্রী রুচিরতিলকাবেন্দুকলযা ।
নিতান্তং গোমাযা নিবিড তমসো নাশ ব্যসনা
তমো মে গাঢং হি হৃদযসদনস্থং গ্লপযতু ॥ ৭॥

অযে মাতঃ কিন্তে চরণ-শরণং সংশ্রযবতাং-
জনানামন্তস্থো বৃজিন হুতভুক্ প্রজ্বলতি যঃ ।
তদস্যাশু সম্যক্ প্রশমনহিতাযৈব বিধৃতং-
করে পাত্রং পুণ্যং সলিলভরিতং কাষ্ঠরচিতম্ ॥ ৮॥

অথাহোস্বিন্মাতঃ সরিদধিপতেঃ সারমখিলং
সুধারূপং কূপং লঘুতরমনূপং কলযতি ।

স্বভক্তেভ্যো নিত্যং বিতরসি জনোদ্ধারিণি শুভে
বিহীনে দীনে ময্যপি কৃপয কিংচিত্ করুণযা ॥ ৯॥

সদৈব ত্বৎপাণৌ বিধৃতমরবিন্দং দ্যুতিকরং
ত্বিদং দর্শং দর্শং রবিশশিসমং নেত্রযুগলম্ ।
বিচিন্ত্য স্বাং বৃত্তিং ভ্রমবিষমজালেঽস্তি পতিত-
মিদং মন্যে নোচেত্ কথমিতি ভবেদর্ধ-বিকচম্ ॥ ১০॥

স্বযং মাতঃ কিংবা ত্বমসি জলজানামপি খনি-
র্যতস্তে সর্বাঙ্গং কমলমযমেবাস্তি কিমু নো ।
তথা ভীত্যা তস্মাচ্ছরণমুপযাতঃ কমলরাট্ -
প্রযুঞ্জানোঽশ্রান্তং ভবতি তদিহৈবাসনবিধৌ ॥ ১১॥

দিবৌকোভির্বন্দ্যে বিকসিত সরোজাক্ষি সুখদে
কৃপাদৃষ্টের্বৃষ্টিঃ সুনিপততি যস্যোপরি তব ।
তদীযা বাঞ্ছা কিং দ্রুতমনু বিধেযাস্তি সকলা
অতোমন্তোস্তন্তূন্ মম সপদি ছিত্বাঽস্ব সুখয ॥ ১২॥

করেঽক্ষাণাং মালা প্রবিলসতি যা তেঽতিবিমলে
কিমর্থং সা কান্ বা গণযসি জনান্ ভক্তি নিরতান্ ।
জপন্তী কং মন্ত্রং প্রশমযসি দুঃখং জনিজুষা
মযে কা বা বাঞ্ছা তব বরিবৃতি ত্বত্র বরদে ॥ ১৩॥

ন মন্যে ধন্যোঽহং ত্ববিতথমিদং লোকগদিতং

মমাত্রোক্তির্মত্বা কমলমিব ফুল্লং তব করম্ ।

বিজৃম্ভা সংযুক্ত দ্যুতিময়মিদং কোকনদমি-

ত্যরং জানানেযং মধুকরততিঃ সংবিলসতি ॥ ১৪॥

মহামোহাম্ভোধৌ মম নিপতিতা জীবনতরি-

র্নিরালম্বা দোলা চলিত দুরবস্থামধিগতা ।

জলাবর্ত ব্যালো গ্রসিতুমভিতো বাঞ্ছতি চ তাং

করালম্বং দত্ত্বা ভগবতি দ্রুতং তারয শিবে ॥ ১৫ ।

দধানাসিত্বং যত্ স্ববপুষি পযোধারি-যুগল-

মিতি শ্রুত্বা লোকৈর্মম মনসি চিন্তা সমভবত্ ।

কথং স্যাত্ সা তস্মাদলক লতিকা মস্তক ভুবি

শিরোদ্যাং হৃদ্যেযং জলদপটলী খেলতি কিল ॥ ১৬॥

তথা তত্রৈবোপস্থিতিমপি নিশীথিন্যধিপতেঃ

প্রপশ্যামি শ্যামে সহ সহচরৈস্তারক গণৈঃ ।

অহোরাত্রঃ ক্রীডা পরবশমিতাস্তেঽপি চকিতা-

শ্চিরং চিক্রীডন্তে তদপি মহদাশ্চর্য-চরিতম্ ॥ ১৭॥

যদাহুস্তং মুক্তা পটল জটিতং রত্ন মুকুটং

ন ধত্তে তেষাং সা বচনরচনা সাধুপদবীম্ ।

নিঃশেষা কেশাস্তু নহি বিগত বেশা ধ্রুবমিতি
প্রসন্নাঽধ্যাসন্না বিধুপরিষদেষা বিলসতি ॥ ১৮॥

ত্রিবীজে হে দেবি ত্রি প্রণবসহিতে ত্র্যক্ষরযুতে
ত্রিমাত্রা রাজন্তে ভুবনবিভবে হ্যোমিতিপদে ।
ত্রিকালং সংসেব্যে ত্রিগুণবতি চ ত্রিস্বরময়ি
ত্রিলোকেশৈঃ পূজ্যে ত্রিভুবনভযাত্ত্রাহি সততম্ ॥ ১৯॥

ন চন্দ্রো নৈবেমে নভসি বিততা তারকগণাঃ
ত্বিষাং রাশী রম্যা তব চরণযোরম্বুনিচয়ে ।
পতিত্বা কল্লোলৈঃ সহ পরিচযাদ্বিস্তৃতিমিতা
প্রভা সৈবাঽনন্তা গগনমুকুরে দীব্যতি সদা ॥ ২০॥

ত্বমেব ব্রহ্মাণী ত্বমসি কমলা ত্বং নগসুতা
ত্রিসন্ধ্যং সেবন্তে চরণযুগলং যে তব জনাঃ ।
জগজ্জালে তেষাং নিপতিত জনানামিহ শুভে
সমুদ্ধারার্থং কিং মতিমতি মতিস্তে ন ভবতি ॥ ২১॥

অনেকৈঃ পাপৌঘৈর্লুলিত বপুষং শোক সহিতং
লুঠন্তং দীনং মাং বিমল পদযো রেণুষু তব ।
গলদ্বাষ্পং শশ্বদ্ জননি সহসাশ্বাসনবচো
ব্রুবাণোত্তিষ্ঠ ত্বং অমৃতকণিকাং পাস্যসি কদা ॥ ২২॥

ন বা মাদৃক্ পাপী নহি তব সমা পাপহরণী

ন দুর্বুদ্ধির্মাদৃক্ ন চ তব সমা ধী বিতরিণী ।

ন মাদৃগ্ গর্বিষ্ঠো নহি তব সমা গর্বহরণী

হৃদি স্মৃত্বা হ্যেবং মামযি কুরু যথেচ্ছা তব যথা ॥ ২৩॥

দরীধর্তি স্বান্তেঽক্ষর বর চতুর্বিংশতিমিতং

ত্বদন্তর্মন্ত্রং যত্ত্বযি নিহিত চেতো হি মনুজঃ ।

সমন্তাদ্ ভাস্বন্তং ভবতি ভুবি সঞ্জীবনবনং

ভবাম্ভোধেঃ পারং ব্রজতি স নিতান্তং সুখযুতঃ ॥ ২৪॥

ভগবতি লহরীযং রুদ্রদেব প্রণীতা

তব চরণ সরোজে স্থাপ্যতে ভক্তিভাবৈঃ ।

কুমতিতিমিরপঙ্কস্যাঙ্কমগ্নং সশঙ্কং

অযি খলু কুরু দত্বা বীতশঙ্কং স্বমঙ্কম্ ॥ ২৫॥

॥ ইতি শ্রী রুদ্রদেব বিরচিত গাযত্রী লহরী সমাপ্তা ॥

Encoded and proofread by Sunder Hattangadi sunderh at hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Gayatri Lahari Lyrics in Bengali PDF
% File name : gAyatrI_laharI.itx
% Category : laharI
% Location : doc_devii
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Sunder Hattangadi sunderh at hotmail.com
% Proofread by : Sunder Hattangadi sunderh at hotmail.com
% Source : Gayatri Mahavijnana -Pandit Rama Sharma Acharya,
% Latest update : Mar. 14, 2014
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website